स आसीत् तेजस्वी ...

• (सं) लीलावती

ङ्गालराज्ये नाडियामण्डले गोदैनदीतीरे कोया नाम कश्चन ग्रामः आसीत् । १९०६ तमे वर्षे एप्रिल्मासे एकस्मिन् दिने सायङ्काले व्याघ्रगर्जनेन ग्रामस्य शान्तितायाः भङ्गः अभवत् । व्याघ्रगर्जनं श्रुत्वा केचन धैर्येण तस्यां दिशि गतवन्तः । बहवः भीत्या दूरे एव स्थितवन्तः ।

ये अग्रे गतवन्तः ते तत्र यत् प्रवर्तमानम् आसीत् तत् दृष्ट्वा स्तब्धाः अभवन् । ते स्वजीवने कदापि तादृशं घोरं दृश्यं न दृष्टवन्तः आसन् ।

कश्चित् युवकः एकाकी व्याघ्रेण सह युद्धं कुर्वन् आसीत् । व्याघ्रः अपि सामान्यः न । सः नव हस्त(feet)-परिमितदीर्घः बलवान् च आसीत् । युवकस्य हस्ते केवला एका छुरिका आसीत् ।

सामान्यतः विंशतिनिमेषपर्यन्तं युद्धं प्रवृत्तम् । कदाचित् व्याघ्रस्य एव प्राबल्यं भवति स्म, पुनः कदाचित् युवकस्य । भूमिः सर्वा रक्तसिक्ता अभवत् । अन्ते युवकः व्याघ्रं मारयित्वा आनन्देन ततः आगतवान् ।

तावति काले तस्य शरीरं जर्झरितम् आसीत् । शरीरे सर्वत्र व्रणाः । ग्रामजनाः तं वैद्यस्य समीपं नीतवन्तः । वैद्यः तस्य परीक्षां कृत्वा उक्तवान् - ''यदि एषः रक्षणीयः तर्हि अस्य दक्षिणपादः कर्तनीयः भवेत्'' इति ।

युवकः पादकर्तनं न अङ्गीकृतवान् । ''मया अङ्गवैकल्येन विना जीवनीयम्'' इति सः दृढतया उक्तवान् ।

वैद्यः अपि किमपि कर्तुम् अशक्नुवन् पादकर्तनं विना एव तस्य चिकित्सां कृतवान् । युवकः अचिरात् एव पूर्णरूपेण स्वस्थः अभवत् । तस्य स्वास्थ्यं दृष्ट्वा वैद्यः अपि आश्चर्यचकितः । सः उक्तवान् - ''मम जीवने अहं कदापि एतादृशं चमत्कारं न दृष्टवान्, न श्रुतवान् अपि । अयं युवकः स्वमनोबलेनैव स्वस्थः अभवत्'' इति ।

सः युवकः अग्रे उद्योगं प्राप्तवान् । प्रथममासस्य वेतनम् अपि तेन प्राप्तम् । तत् स्वीकृत्य गृहम् आगच्छन् आसीत् सः । तदा मार्गे तस्य स्नेहितः कश्चित् मिलितवान् । सः उक्तवान् - ''भोः, मम मातुः बहु अस्वास्थ्यम् । चिकित्सार्थं धनम् एव नास्ति । किं करणीयम् इति न जानामि'' इति ।

मित्रस्य वचनं श्रुत्वा युवकः बहु दुःखितः अभवत् । सः तदा एव आनीतं वेतनं पूर्णमपि मित्राय दत्त्वा - ''मात्रे औषधं दापयतु'' इति उक्तवान् ।

एवम् आसीत् तस्य करुणामयं हृदयम् ।

सः युवकः शरीरेण बलवान्, हृदयेन कोमलः च आसीत् इति वयं ज्ञातवन्तः एव । सः कदापि अन्याय्यं न सहते स्म ।

तदा भारते आंग्लसाम्राज्यम् आसीत् । कदाचित् सः युवकः कलकत्तानगरे गोराबजारप्रदेशे गच्छन् आसीत् । तदा सः एकं विशिष्टं दृश्यं दृष्टवान् । कश्चित् आंग्लाधिकारी हस्तेन दण्डं गृहीत्वा तेन पार्श्वे स्थितान् जनान् विनाकारणं प्रहरन् 'एकं, द्वे, त्रीणि' इति गणयन् आगच्छन् आसीत् । वृद्धान्, महिलाः, बालान्, दुर्बलान् चापि निर्दयं ताडयन् सः पैशाचम्

आनन्दम् अनुभवन् आसीत् । एतत् दृष्ट्वा युवकः तस्य समीपं गतवान् ।

तदा सः अधिकारी 'अष्टचत्वारिंशत्' इति वदन् कञ्चित् प्रहरन् आसीत् । युवकः तस्य समीपं गत्वा बलात् तस्य हस्तात् दण्डं आकृष्य 'नवचत्वारिंशत्' इति उक्त्वा तम् अधिकारिणम् एव सम्यक् प्रहृतवान् । तदनन्तरं सः अधिकारी कदापि तादृशं कृत्यं कर्तुं स्वप्ने अपि धैर्यं न प्राप्तवान् ।

आंग्लाः तु भारतीयानां विषये बहुधा दौर्जन्यं कुर्वन्ति स्म । सः युवकः यत्र कुत्रापि वा भवतु, धैर्येण तादृशान् योग्यरीत्या दण्डयति स्म । तस्य सहवासेन भीरुः अपि पराक्रमी भविष्यति इति जनाः वदन्ति स्म ।

कदाचित् सः युवकः डार्जिलिङ्गं प्रति धूमशकटेन गच्छन् आसीत् । तेन सह तस्य विभागे एव चत्वारः आंग्लेयाः सैन्याधिकारिणः आसन् । मध्ये एकत्र यदा धूमशकटः स्थगितः तदा युवकः अस्वस्थाय कस्मैचित् जलम् आनेतुं यानात् अवतीर्णवान् । ते अधिकारिणः अपि अवतीर्य प्लाट्पार्म् मध्ये गर्वेण अटन्तः आसन् । युवकः यदा जलम् आनयन् आसीत् तदा अकस्मात् एकस्य अधिकारिणः उपरि किञ्चित् जलं पतितम् । सः अधिकारी अनुक्षणं दण्डेन युवकं प्रहृतवान् ।

युवकः प्रथमं मौनं जलं स्वीकृत्य आगत्य रुग्णाय दत्तवान् । पश्चात् पुनः तत्र गत्वा तम् अधिकारिणं गृहीतवान् । तदा अन्ये त्रयः अपि तस्य उपरि आक्रमणं कृतवन्तः । किन्तु युवकः चतुरः अधिकारिणः अपि सम्यक् प्रहृत्य अधः पातितवान् ।

महान् कोलाहलः संवृत्तः । आरक्षकाः आगतवन्तः । ते तं युवकं बन्धुम् उद्युक्ताः । तदा सः आरक्षकान् उक्तवान् - ''अहं शासकीयकार्यार्थं गच्छन् अस्मि । यदि मम बन्धनेन शासकीयकार्यस्य भङ्गः भवति तर्हि

भवन्तः एव तस्य कारणीभूताः भविष्यन्ति'' इति ।

तस्य वचनं श्रुत्वा आरक्षकाः अग्रे प्रयाणं कर्तुं तस्मै अनुमतिं दत्तवन्तः ।

किन्तु न्यायालये तस्मिन् विषये विचारणम् आरब्धम् । न्यायाधीशः अपि आंग्लः एव । सः तान् अधिकारिणः पृष्टवान् - ''किं भवतः चतुरः अपि अधिकारिणः एषः एकः एव पातितवान् ?'' इति ।

''आम्, सत्यम्'' इति चत्वारः अपि उत्तरं दत्तवन्तः ।

न्यायाधीशः क्षणं यावत् मौनं स्थितवान् । पश्चात् - ''चत्वारः आंग्लाः सैन्याधिकारिणः एकेन भारतीयेन पराजिताः इति विषयः यदि सर्वत्र प्रसृतः भवति तर्हि अस्माकं मानस्य हानिः भवेत् । अपि च तेन भारतीयाः इतोऽपि देशकार्यं कर्तुं स्फूर्तिं प्राप्नुयुः'' इति उक्त्वा तं युवकं तथैव त्यक्तवान् ।

सः युवकः बाल्ये एव बहूनां महापुरुषाणां सहवासं प्राप्तवान् आसीत् । प्रथमं सः निवेदितायाः परिचयं प्राप्तवान् । सा विवेकानन्देन तस्य मेलनं कारितवती । अन्ते सः महर्षेः अरविन्दस्य मार्गदर्शने क्रान्तिकारिजीवनम् आरब्धवान् । राष्ट्रकार्यं कुर्वन् एव सः राष्ट्राय स्वजीवनं समर्पितवान् । सः युवकः एव बङ्गालस्य प्रसिद्धः क्रान्तिकारी श्री जतीन्द्रनाथमुखर्जी ।

❐❐